सलिलाशयम्। ततः प्रस्तुततोयन्तं प्रसमीक्ष्य जलाशयम्। बबन्धुर्विविधैर्योगैर्मत्स्यान् मत्स्योपजीविनः विलोड्यमाने तस्मिंस्तु स्नुततोये जलाशये। अगच्छन्नवनं तत्र दीर्घसूत्रः सहापरैः। उद्दाने क्रियमाणे तु मत्स्यानां तत्र रज्जुभिः। प्रविश्यान्तरमेतेषां स्थितः सम्प्रतिपत्तिमान्। गृह्यमेव तदुद्दानं गृहीत्वा तं तथैव सः। सर्वानेव च तांस्तत्र ते विदुर्ग्रथितानिति। ततः प्रक्षाल्यमानेषु मत्स्येषु विपुले जले। मुक्त्वा रज्जुं प्रमुक्तोऽसौ शीघ्रं सम्प्रतिपत्तिमान्। दीर्घसूत्रस्तु मन्दात्मा हीनबुद्धिरचेतनः। मरणं प्राप्तवान् मूढो यथैवोपहतेन्द्रियः। एवं प्राप्ततमं कालं यो मोहान्नावबुध्यते। स विनश्यति वै क्षिप्रं दीर्घसूत्रो यथा झषः। आदौ न कुरुते श्रेयः कुशलोऽस्मीति यः पुमान्। स संशयमवाप्नोति यथा सम्प्रतिपत्तिमान्। अनागतविधाता च प्रत्युत्पन्नमतिश्च यः। द्वावेव सुखमेधेते दीर्घसूत्रो विनश्यति" कर्म०। २दीर्घे सूत्रे न०। ६ब०। ३दीर्घतन्तुके त्रि० "दीर्घसूत्रमकरोत् परिधानम्" माघः।

**दीर्घसूत्रिन्** त्रि० दीर्घं सूत्रं कर्तव्यव्यापारोऽस्त्यस्य इनि। चिरक्रियावति। "अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः। विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते" गीता। "यदह्ना कार्यं तन्मासेनापि यो न सम्पादयति स दीर्घसूत्री" कात० रघु०।

**दीर्घस्कन्ध** पु० दीर्घः स्कन्धः काण्डोऽस्य। तालवृक्षे राजनि०

**दीर्घा** स्त्री दीर्घ+टाप्। पृश्निपर्ण्याम् राजनि०।

**दीर्घाध्वग** पु० दीर्घमायतमध्वानं गच्छति गम—ड ६त०। (धावोडिया) ख्याते पत्रवाहकभेदे।

**दीर्घायु** त्रि०दीर्घमायुः यस्य। चिरकालजीविनि "जीवातुश्च दीर्घायुत्वं मे" यजु०१८।६ "दीर्घायुत्वाय प्रति एतं न आयुः" ऋ०८।५६।७

**दीर्घायुध** पु० नित्यकर्म०। कुन्तास्त्रे त्रिका०। दीर्घं दन्तरूपमायुधं यस्य दीर्घात् आयुध्यते आ+युध—क। १शूकरे पुंस्त्री शब्दमा०।

**दीर्घायुष** पु०दीर्घमायुष्यं यस्य। १श्वेतमन्दारकवृक्षे २मार्कण्डेये च राजनि०। ३आयतायुर्युक्तेषु चिरजीविशब्दार्थोक्तेषु त्रि० कर्म०। ३दीर्घे बहुकालव्यापके आयुषि तत्कारणमुक्तं मनुना। "ऋषयो दीर्घसन्ध्यत्वात् दीर्घमायुरवाप्नुयुः"।

**दीर्घायुस्** पु०दीर्घमायुरस्य। १दीर्घायुष्ययुक्ते २चिरजीविशब्दोक्तार्थे च। "दीर्घायुस्त्वे ओषधे! खनिता" यजु० १।२१००

**दीर्घालर्क** पु० दीर्घोऽलर्क इव। श्वेतमन्दारवृक्षे राजनि०।

**दीर्घास्य** त्रि० दीर्घमास्यं यस्य। १आयतमुखे २हस्तिनि च ३शिवानुचरभेदे दीर्घलोचनशब्दे दृश्यम् दीर्घमास्यं यत्र देशे। ४पश्चिमोत्तरदेशभेदे वृ०सं०१४अ०वाक्यं दीर्घग्रीवशब्दे दृश्यम्।

**दीर्घाहन्** पु०दीर्घाण्यहानि यत्र। निदाघसमये इह "हलन्त्यादि" पा० सुलोपे प्रत्ययलक्षणेन "रोऽसुपि" पा० रकारनिषेधेन रुत्वस्यासिद्धत्वात् न नान्तलक्षण उपधादीर्घः" सि०कौ०। दीर्घाह्ना इत्यत्र "अह्नोऽदन्तात्" पा० णत्वम् कर्म०। "राजाहःसखिभ्यः टच्" पा० टच्। दीर्घाह दीर्घदिवसे पु०।

**दीर्घिका** स्त्री दीर्घैव स्वार्थे क कापि अत इत्वम्। १जलाशयभेदे तत्प्रमाणं जलाशयोत्सर्गतत्त्वे यथा नव्यवर्द्धमानधृतवसिष्ठः "शतेन धनुर्भिः पुष्करिणी। त्रिभिः शतैर्दीर्घिका, चतुर्भिर्द्रोणः पञ्चभिस्तडागः!। द्रोणाद्दशगुणा वापी" इति संहितायामन्तरपदस्तुतेरत्रापि तथावगम्यते। तेन चतुर्दिक्षु पञ्चविंशद्धस्तान्यूनतायां द्वादशशतहस्तान्तरान्यूनत्वेन दीर्घिका" "मृद्भाहतं क्रोशति दीर्घिकाणाम्" रघुः। २जलाशयमात्रे "स्वर्णदी सुरदीर्घिका" अमरः दीर्घिकाभिश्च पूर्णाभिस्तया पुष्करिणीभिर्हि" भा०आ० १२८अ०।

**दीर्घवांक** नित्यकर्म०। डङ्करीलताभेदे राजनि०। [४भये च न०

**दीर्ण** त्रि० दॄ—क्त। १विदारिते २भीते च भावे क्त। ३विदारे

**दीस** त्रि०दी—क्षये क्विप् तां स्यति सो—क। क्षयनाशके गवादिगणे दीप्रेत्यत्र दीसेति पाठान्तरात् हितादौ यत्। दीस्य तद्धितादौ त्रि०।

**दु** गतौ भ्वा०पर०अक०अनिट्। दवति अदौषीत् केचित्तु वेडयमित्याहुस्तेन अदावीदित्यपि। दुदाव वेट् क्त्वेऽपि लिटि नित्येट् दुदुविव। दूनः। "पित्तेन दूने रसने सितापि" नैष०।

**दु** उपतापे स्वा०प०सक०सेट्। उपतापःपीडनम्। दुनोति अदावीत् अदौषीत् लिटि नित्येट् दुदुविव। दुतः। "स्फुटतया दुतया" माघः। "दुनोति निर्गन्धतया स्म चेतः" कुमा० "स भक्तसाङ्कारारीन् दुदाव च कृतान्तवत्" भट्टिः "स्वदु दूयेत यदङ्गमर्पितम्" रघुः कर्मकर्तरि रूपं दू—खेदे दैवादिकस्य वा रूपम्।